**Shodhshauryam, International Scientific Refereed Research Journal**
Available online at : **www.shisrrj.com**
OPEN ACCESS
© 2024 SHISRRJ | Volume 7 | Issue 3
ISSN : 2581-6306
**doi :** https://doi.org/10.32628/SHISRRJ

# अपराजितामहाकाव्ये सामाजिकसम्बन्धः

सुचित्रा साहुः
अनुसन्धात्री,साहित्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः, तिरुपतिः, आन्ध्रप्रदेशः।

**Article Info**

**Article History**
Received : 03 May 2024
Published : 15 May 2024

**Publication Issue :**
May-June-2024
Volume 7, Issue 3

**Page Number :** 42-54

**संक्षिप्तिका** - कविः सर्वदा सामाजितविषयवस्तु स्वीकृत्य काव्यानि लिखति। अतः काव्यं साहित्यं वा समाजस्य दर्पणः इति उच्यते। विशिष्टतया अत्र विविधसामाजिसम्बन्धानामुल्लेखः क्रियते। मानवानां समूहः समाज इत्युच्यते। अत्र सर्वे मानवाः परस्परं सहयोगं कृत्वा सौहार्देन तिष्ठन्ति। समाज एव तेषां विविधावश्यकतानां परिपूरणं करोचि। मानवस्य जीवनं जीविका च समाजमाध्यमेन एव सुचारु सम्पद्येते । काव्यरचनापरम्परायां कविः श्रीयुक्तपूर्णचन्द्रशास्त्रिकलावटिया अन्यतमः। अनेन विशिष्टतया सामाजिकप्रथापरम्परामाधारीकृत्य अपराजिताबधूमहाकाव्यं प्रणीतवान्। अत्र एकस्याः कुलवध्वाः जीवनं जीविका वर्ण्यते। अस्याः सामाजिकस्थितिः उट्टङ्क्यते। एवं विषयवस्तु स्वीकृत्य प्रकृते शोधे केचन सामाजिकसम्बन्धाः परिशीलयिष्यन्ते। यथा - पतिपत्नीसम्बन्धः, पितापुत्रसम्बन्धः, मातृपुत्रसम्बन्धः, सपत्नीसम्बन्धः इत्यादिः।

**कूटशब्दाः –** जाया, विधवा, सपत्नी, कुलवधूः, पत्नी, अपराजिता, ग्रामपञ्चायतनम्, श्रीपञ्चः इत्यादिः।

अलौकिकप्रतिभावान् सहृदयः जन्मजातसर्जनात्मकयोग्यतया तथा च शास्त्रज्ञानाभ्यासेन सरस्वत्या अनुगृहीतः निरवद्यं काव्यं कर्तुं समर्थो भवति नान्यः। संसारे जायमानानां समस्यानाम् अवलोकनं कृत्वा तासां समस्यानां समाधानोपायान् आविष्कृत्य विचारप्रवाहेण, अभिव्यक्तिप्रवाहेण, साहचर्यप्रभावेण प्रवाहितस्सन् अयं कविः शब्दप्रवाहे प्रवाहितः सृजति अपूर्वं काव्यचित्रम्। सृष्टेः प्रारम्भादेव एषा रचनाकला महर्षिषु अवलोक्यते स्म। वैदिककाले मन्त्रद्रष्टारः महर्षयः अस्यां कलायां निपुणा आसन्। तेषामनवद्या सृष्टिः ईश्वरप्रोक्ताः वेदा एव भवन्ति काव्यस्य अनुपमदृष्टान्ताः। ततः परं या काऽपि अक्षराभिव्यक्तिः उपनिषत्-पुराण-धर्मशास्त्र-रामायण-महाभारत-काव्य-नाटकादिरूपेण प्राप्यते, यः कोऽपि रचनासम्भारः दृष्टिगोचरोऽपि भवति तत्सर्वमपि कविप्रतिभाप्रसूतं मौलिकम्, नवीनम्, समाजोपयोगि इति नास्ति सन्देहस्यावकासः। आप्राचीनकालात् एतादृशी रचनापरम्परा अवलोक्यते । इदानीमपि एषा परम्परा नावरुद्धा । महामनीषिभिः ऋषिभिः कविभिः यानि काव्यानि रचितानि, तेषां स्वरूपं प्रयोजनम्, प्रकारभेदाः अलङ्कारादिशास्त्रेषु सुष्ठु उपनिबद्धाः। आधुनिकुयगेऽस्मिन् ऊनविंशशतके सुप्रसिद्धेषु कविषु श्रीयुक्तपूर्णचन्द्रशास्त्री कलावटियामहोदयोऽस्ति नवयुगनिर्माणस्य नवसमाजसंघटनस्य अद्वितियः स्रष्टा। अनेन काव्यद्वयं प्रणीतमिति पूर्वस्मिन् अध्याये आलोचितम् । यथा - (1) प्रबुद्धभारतम् (2) अपराजितवधूमहाकाव्यञ्च ।

अत्र अपराजितवधूमहाकाव्यस्य कथावस्तु विशिष्टरूपेण सामाजिकसम्बन्धमेव आश्रित्य रचितमस्ति। अस्य काव्यस्य मुख्यनायिकायाः तथा तस्याः पतेः सुधाकरस्य सम्बन्धोऽत्र कविनोप-स्थाप्यते। अधुनातनपरिवारेषु जायमानानां समस्यानां ज्वलच्चित्रम् अत्र काव्ये द्रष्टुं शक्यते । प्रभा अस्य काव्यस्य नायिका भवति । सुधाकरेण साकं तस्याः विवाहः जायते। एवमनयोः वैवाहिकजीवनस्य सम्बन्धः, सुधाकरस्य सामाजिकविरुद्धकार्यरूपेण कामनावशीभूतस्सन् प्रथमपत्नीं त्यक्त्वा अन्यया रूपश्रीकन्यया सह ग्रामं त्यक्त्वा पलायनम्, प्रभायाः द्वाभ्यां पुत्राभ्यां साकं जीवनसङ्घर्षश्च विशिष्टरूपेण काव्यस्य कथावस्तु भवति।

**Copyright © 2024 The Author(s):** This is an open-access article distributed under the terms of the Creative Commons Attribution **4.0 International License (CC BY-NC 4.0)**

नायिकाया: प्रभाया: श्वशुरालयजनै: बन्धुभिस्साकं य: सम्बन्ध: आसीत्, तां प्रति श्वशुरस्य श्वयाश्च या मधुरा सहयोगिभावनाऽऽसीत् तदपि कविनाऽत्र प्रतस्तूयते। पतित्यक्ताया: प्रभाया: पत्या, श्वशुरालये जनैस्साकं, ग्रामवासिभिस्साकम्, ओडिशाराज्ये महिलाभिस्साकं, विशिष्टतया कविना साकम्, कैश्चिदधिकारिभिस्सह, सपत्न्या साकम्, मदरटेरेसया साकं प्राप्त: सामाजिकसम्बन्ध: सम्पूर्णेऽस्मिन् काव्ये तत्र कविना वर्ण्यते।

अयं सम्बन्ध: कुत्रचित् सहयोगात्मक: क्वचिच्चासहयोगात्मको भवति। प्रभाया: जीवनं कुत्रचित्सङ्घर्षमयं भवति। कुत्रचिच्च सा सज्जनेभ्य: प्रत्यक्षतया परोक्षतया सहयोगमपि प्राप्नोति । एवं सहयोग-सङ्घर्षमयसामाजिकजीवनं प्रभाया: अत्रोपस्थाप्यते ।

(1) कुलवधू: - एषा नायिका एकस्य कृषकपरिवारस्य वधूरासीत्। कवि: लिखति -

**तत्रादर्श: कृषकपरिवारोऽस्ति धन्यो धरित्र्यां**

**नित्यानन्दं श्रयति बहुश: शस्यसम्पन्नतायाम् ।**

**सम्मानेन प्रचलितनयेनार्जिता जीविकाऽस्य**

**काव्यस्यास्य प्रकृतिरसना तद्वधूर्नायिकाऽस्ति ।।**[1]

एवं काव्येऽस्मिन् कथामुखेन कृषकसमाजस्य, नारीसमाजस्य, पुरुषसमाजस्य, परिवार- सम्बन्धस्य, नारीकल्याणसमिते: सामाजिककार्याणाम्, ग्रामपञ्चायतस्य, धार्मिकसमाजस्य, ख्रीष्टसमाजस्य च स्वरूपं प्रतिपादयितुं कवि: प्रयत्नं कृतवान् ।

सर्वादौ काव्यस्य प्रथमसर्गे कवि: कुलवध्वा: श्वशुरालये य: मधुरसम्बन्ध: आसीत् तदुपस्थापयति । काव्यस्य नायिका प्रभा अतीव संस्कारवती महिला, गृहस्य पारम्परिकाणि सर्वाणि कार्याणि कर्त्तुं समर्था शिक्षादीक्षानिपुणा कलवधू: सर्वैस्साकं मधुरं सम्पर्कं संस्थाप्य गृहे अतीव प्रियतमाऽऽसीत् सर्वेषाम् । उच्यते कविना -

**शिक्षादीक्षाऽभवदभिनवोत्थानरीत्या यदिया**

**सैषा प्रीत्या परिणयगता शिक्षयित्र्यास्तु कन्या ।**

**सत्पात्राय प्रकृतिसरलायैव दत्ता पितृभ्या-**

**मादर्शोऽभून्नवपरिणयो हेमरत्नस्य योग: ।।**[2]

अतीव बुद्धिमत्या: प्रभाया: विवाह: एकेन सत्पात्रेणाभवत् । कवि: अनयो: दम्पत्यो: सम्बन्ध: हेमरत्नसम्बन्ध इत्युल्लिखति । भारतीयसनातनसंस्कृतौ आदर्शपरिवार: गृहस्थधर्माश्रितो भवति । गृहस्थाश्रम: सर्वश्रेष्ठाश्रम इत्युच्यते । अस्यारम्भ: विवाहादनन्तरमेव जायते । विवाहितपति: पत्नी च मिलत्वा परिवारम् अग्रे सारयन्ति, परिवारस्य रक्षणं पोषणञ्च कुर्वन्ति । प्रभा आचारव्यवहारै: एकस्मिन् कृषकपरिवारे वधूत्वं सम्प्राप्य प्रत्येकमपि कृषकसम्प्रदायस्य कार्यं सुचारु चालितवती । किन्तु यथा पूर्वमालोचितं यत् समाजे सहयोगिता, सङ्घर्ष: इत्युभयं प्राप्यते इति, तद् दृष्ट्या प्रभाया: जीवनमपि तस्मिन् कृषकपरिवारे द्वन्द्वात्मकं जातमासीत् । यद्यपि तत्र सहयोगिता प्राप्ता तथापि एकस्मिन् समये पति: यदा अन्यया साकं विवाहं कृत्वा तां त्यक्त्वा पलायित:, तदा तस्य सङ्घर्षमयं जीवनं प्रारब्धम् । एवं सहयोगसङ्घर्षयो: सामाजिकं चित्रं कविना अस्मिन् काव्ये उपस्थापितम् । स्वयमपि लिखति कवि:-

**सा संस्कारात्स्वकुलवचने सर्वथा दत्तचित्ता**

**पारम्पर्यान् कृषकगृहिणीकर्मभारानुवाहा ।**

**तस्या: द्वन्द्वं चरितमपि तेंहपीडासमष्टि-**

---

[1] अ.व.म. - 1/8

[2] तत्रैव - 1/9

**रस्मिन् काव्ये ससुखसमयो वर्ण्यतेऽत्र प्रभायाः ।।**[3]

कुलवध्वाः एकस्याः ये उत्तमगुणाः सामाजिकबन्धनं सुदृढं कर्तुमपेक्षन्ते ते सर्वेऽपि गुणाः प्रभायाः समीपे आसन् । यथा कविनोच्यते –

**विश्वासोऽस्या नगरगुणिनामङ्गनाभिः प्रशंसा**

**बुद्धस्तीक्ष्णाऽभिनवघटनाकारणान्वेषणेषु ।**

**नारीमात्रे तु गृहकलहद्वन्द्वदोषान् प्रमार्ष्टुं**

**सम्मानं साऽभिलषतितरां भद्रलोकैर्यथेष्टम् ।।**[4]

प्रभायाः गुणानां प्रशंसा सर्वा अपि तन्नगरवास्तव्याभिः अङ्गनाभिः क्रियते स्म । समस्यानां मूलम् अन्वेष्टुं बुद्ध्या सा अतीवपटुतमाऽऽसीत् । सर्वदा नारीणां गृहकलहस्य द्वन्द्वानां निराकरणे पटुतमायाः तस्याः सर्वेऽपि प्रशंसामकुर्वन् ।

गृहे सर्वेऽपि बान्धवाः, कुटुम्बिनः, स्त्रियः तस्या उपरि सन्तुष्टा आसन् । शुद्धाचारव्यवहार–सम्पन्नां वधूं सम्प्राप्य सर्वेऽपि आनन्दिताः बभूवुः । श्वश्रूः, तातः श्वशुरश्च सुलक्षणायाः तस्याः गुणैः अतीवप्रभाविताः । उक्तं च कविना –

**तस्यां तुष्टा गृहपरिजना बान्धवा वंशनार्यः**

**शिष्टाचारां कुलजतनयां प्राप्य सर्वे प्रसन्नाः ।**

**श्वश्रूस्तातो गृहपतिरतो गर्विता मोदमग्नाः**

**एवं ग्रामे कुलमिदमहो श्लाघ्यतामाप नित्यम् ।।**[5]

एकस्य परिवारस्य मध्ये मधुरसम्बन्धः गृहिणी कुलवधू एव संस्थापयितुं शक्नोति । यदि सा दुष्टा खलमतिर्भवति तर्हि सम्पूर्णः परिवारः नष्टो जायते । सामाजिकसम्बन्धेषु सहयोगिभावना, नैतिकमूल्यपूर्णभावनैव परिवारं सुदृढं विदधाति । प्रभा अस्मिन् सम्बन्धस्थापनसम्बन्धे आदर्शभूता आसीदिति कविः प्रतिपादयति ।

किन्तु यदा तस्याः पतिः सुधाकरः तां त्यक्त्वा रमण्यन्तरे रमणं कृत्वा देशान्तरं पलायितः, तदा सा कुलवधूः समाजे निन्दायाः पात्रमभूत् । कविः लिखति –

**प्रीत्याऽऽनीता देववाणीव गीता**

**श्ववा सिक्ता स्नेहशुद्धोदकेन ।**

**आसीत्कालो हर्षपूरेण यस्या**

**निन्द्या जाता सैव हृद्या वधूटी ।।**[6]

सा कुलवधूः प्रीत्या श्वशुरालयं प्रति आनीता, देववाणीव सा सर्वेषां गृहजनानां प्रशंसापात्ररूपा आसीत् । श्वÞवा सा अतीवस्नेहजलेन सा सर्वदा स्नाताऽऽसीत् । किन्तु सा इदानीं निन्दिताऽस्ति समाजे ।

**(2) पतिपत्नीसम्बन्धः** – कविः पूर्णचन्द्रः काव्येऽस्मिन् प्रभायाः पतेः सुधाकरस्य समाजविरोधिचरित्रम् उपस्थापयति । विवाहस्य कतिचिद्वर्षाभ्यन्तरे प्रभायाः द्वौ पुत्र जातौ । किन्तु तस्याः उद्दण्डपतिः चपलः तरुणः कालदोषेण दूषितः, तस्यां प्रभायां रुचिं न प्रदर्श्य कामनावशीभूतः नार्यन्तरे आसक्तः तां गृहञ्च त्यक्त्वा देशान्तरं पलायितः । यथा कविनोच्यते प्रभामुखेन –

---

[3] तत्रैव – 1/10

[4] तत्रैव – 1/11

[5] तत्रैव – 1/12

[6] तत्रैव – 1/24

**परमपूज्यपतिर्मम पांसुलः कुपथगः परदारसमागमैः ।**

**अपपदः प्रतिपादितपद्धतेः पतिपरार्त्तिपरार्थपराङ्मुखः ॥**[7]

"विनाश्रयं न वर्तन्ते कविता वनिता लता" इत्याभणकानुसारेण समाजे पतिं विना पत्न्याः जीवनं दुःशकमेव भवतीति सर्वविदितोऽयं विषयः । कविः अस्मिन् सन्दर्भे प्रभामुखेन लिखति यत् यथा मात्राहीनस्य छन्दसः दुर्गतिर्भवति, यथा ग्रहणसमये राहुग्रस्तस्य सूर्यस्य स्थितिर्भवति, यथा मेघाकुले आकाशे शारदीचन्द्रिकायाः दुर्दशा भवति तथैव पतिं विना समाजे पत्न्याः दुर्गतिर्भवतीति । तद्धि –

**मात्राहीनच्छन्दसो गुर्गतिर्या**

**राहुग्रस्तस्यापि या भास्करस्य ।**

**मेघावर्तैः शारदीचन्द्रिकायाः**

**भर्त्तृत्यक्ताया दशा मे तथैव ॥**[8]

नारीपुरुषौ विवाहबन्धवे बद्धौ भूत्वा परस्परं सहयोगिनौ जीवनं यापयन्ति । किन्तु अधुनातनसमाजे योग्यवरस्य प्राप्तिः दुःसाध्या वर्तते । गृहे पुत्रो भवति, किन्तु तत्रानन्दः न प्राप्यते । अस्मिन् सन्दर्भे कविनोच्यते यत् – **"भर्तारो नो भर्त्तृकामाश्च कन्याः"**[9] इति ।

परिवारे पतिसेवायाः उल्लेखः नारीणां कृते क्रियते । यदि पत्नी तथा न करोति तर्हि सर्वत्र अशान्तिरेव व्याप्नोति । समाजे नारीणां सदैवावमाननं क्रियते । ज्ञात्वाऽपि जनाः नीरवाः भवन्ति । एतादृश्याः व्यवस्थायाः निन्दा कविनाऽत्र क्रियते । यथा –

**पत्युस्सेवा शसिंता शास्त्रविद्भिः**

**भार्याद्वारा नो कृता चेदशान्तिः ।**

**अत्याचारे स्पष्टदोषोऽप्यदोषो**

**ह्यन्यायं धिक् तां व्यवस्थां च धिक् धिक् ॥**[10]

धर्मशास्त्रेषु उच्यते – **"पुत्रार्थं क्रियते भार्या"** इति । कविः पूर्णचन्द्रो लिखति यत् पुरुषः द्वयोः कार्ययोः पूत्र्त्यर्थं विवाहं करोति । यथा – पुत्रोत्पत्त्यर्थमित्येकम्, कामनायाः तृप्तिरिति द्वितीयम् । अन्येषु कार्येषु तस्याः अधिकारः समाजेन शास्त्रेषु न कल्पितः । यदि नारी स्वेच्छाचारिणी भवति तर्हि सा निन्द्यते, किन्तु पुरुषः यदि तदेव कार्यं करोति तर्हि समाजः निरुत्तरस्तिष्ठति । प्रभायाः पतिः स्वेच्छाचारी बभूव, किन्तु तस्य निन्दा केनापि न क्रियते । कविरत्रोल्लिखति –

**पुत्रोत्पत्तिः कामनायाश्च तृप्ति-**

**र्ह्यन्ये कार्ये वर्तते नाधिकारः ।**

**स्वेच्छाचारो योषितामेव निन्द्यः**

**पुंसां हेतोर्नो निषेधश्च कोऽपि ॥**[11]

यथा कश्चन कृषकः बीजारोपणे दोषमाचरति, तत्परिणामस्वरूपं सस्यानि सम्यक् न प्राप्यन्ते, तत्र च कृषकस्य दोष इति केनापि नोच्यते, अपि तु धरित्रीमाता एव सर्वदा निन्दिता भवति ; अपि च उत्तमशस्यं प्रसूतवत्याः धरित्र्याः कदाऽपि प्रशंसा न क्रियते, किन्तु कृषकस्यैव प्रतिष्ठा

---

[7] तत्रैव – 1/17

[8] तत्रैव – 1/45

[9] तत्रैव – 1/50

[10] तत्रैव – 1/57

[11] तत्रैव – 1/59

सर्वत्र वर्धते ; तथैव कृतापराधेषु पुरुषेष्वपि समाजे नार्या एव अवमाननं भवति, अपि च नारविहितप्रशंसामूलककर्मणा पुरुषस्यैव ख्यातिः वर्धते, पुत्रोत्पत्तिं कृत्वा जनयित्र्याः कुत्रापि नाम प्रसिद्धिपथं नावतरति, पितुरेव नामानं पुत्रः प्राप्नोति । कविनोच्यते –

**यद्दोषश्चेद्भर्तृबीजस्य योगे**

**भार्यादोषो निश्चितो लोकमान्यः ।**

**भर्तुर्नाम्ना ख्यापितौ शस्यपुत्रौ**

**धत्ते बीजं भूरुहो अङ्गना च ।।**[12]

परिवारे पतिपत्न्योः कर्तव्यं विलिख्य आधुनिकसमाजे तत्र कथं पत्न्याः पीडा भवति तदपि कविना द्वितीयसर्गे पुनः पुनः उट्टङ्क्यते । परिवारस्य भरणपोषणदायित्वं पतिपत्न्यौ मिलित्वा कुरुतः । किन्तु पुरुषस्यैव प्रशंसा भवति, नार्या न । पुरुष एव कुटुम्बस्य सञ्चालकः पालकः इत्युच्यते स्त्री न । स्त्री दासीव सर्वाणि कार्याणि सम्पादयति । कविनोच्यते –

**जननपोषणकर्मणि तौ समौ**

**पुरुषमेव गमिष्यति संस्तुतिः ।**

**पुरुष एव कुटुम्बनियामकः**

**सकलभृत्यविधिर्विहितः स्त्रियाम् ।।**[13]

पुनश्चोच्यते –

**यदि भवेदसमर्थतरः पति-**

**स्तदपि सा भवतीह सुसेविका ।**

**हृदयशोषिविडम्बिनयावृतं**

**ननु पतिव्रतमेव परम्परा ।।**[14]

चतुर्थसर्गे कविः पतिपत्न्योः विलासमयजीवनस्य चित्रमुपस्थापयति । प्रभया एका नारीणां जागरणसंस्था प्रस्थापिताऽऽसीत् । तत्र नैकाः महिलाः समाजसेवाकार्येषु लग्ना आसन् । तत्र आदिनं कार्यं कृत्वा यदा रात्रौ विलम्बेन गृहं ताः गच्छन्ति, तदा तासां पतीनां व्यवहारः कविना वर्ण्यते । यथा काऽपि एका सखी वदति –

**भर्ता मे कथयति तीव्रबाणवाक्यं**

**व्यङ्ग्यं वा निशिततरं विलम्बितायै ।**

**आह्वानं त्वभिरुचिपूरणार्थमेव**

**स्वाकर्षान्नयति विलासकामनार्थम् ।।**

**उन्मुक्तां मधुरतमारमाधुरीणां**

**साह्लादं सुरभिततृप्तितत्परां माम् ।**

**सारामे प्रियभवने दृढात्मसत्वः**

---

[12] तत्रैव – 1/61

[13] तत्रैव – 2/27

[14] तत्रैव – 2/28

**नेपथ्ये नटयति नाट्यसन्धिबन्धैः ।।**[15]

अत्र पतिपत्न्योः कामक्रीडा वर्णिताऽस्ति । कविः श्रीपञ्चस्य ग्राममुख्यस्य पत्नाः स्वभावं सुचारुतया वर्णयति । एषा करुणामयी, पतिकार्येण दुःखिनी, तीव्रमानसिकरोगग्रस्ता आसीत् परिवारे तस्याः पतेः स्वभावः उत्तमः नासीदिति् कारणमेव तस्याः दुःखस्य । उत्तमगृहिणीरूपेण सा पुत्रस्य परिवारस्य परिपालनं करोति स्म । यथोच्यते कविना –

**श्रीपञ्चः कथयति निन्दनीयवाक्यं**

**त्यक्ता सा कथमिह पूजिताऽबलाभिः ।**

**श्रीमत्यः कुलपतिमन्दिराङ्गनाश्च**

**स्वैरिण्यः परिचयन्त्यपांशुवृत्तम् ।।**

**भार्याऽस्य प्रसितमनोविकाररुग्णा**

**कारुण्यात्स्वयमपि भर्तृकार्यदग्धा ।**

**सत्पुत्रां प्रकृतिशुभं सुपोष्य सेयं**

**भावत्कं दृढमतिकर्म संशनीयम् ।।**[16]

(3) मातृपुत्रसम्बन्धः – कविः पूर्णचन्द्रः काव्येऽस्मिन् प्रभायाः द्वयोः पुत्रयोः कृते स्नेहभावं दर्शयति । अपि च प्रभायाः पतेः सुधाकरस्य कृते तस्याः श्वशुरस्य श्वयाश्च ममत्वभावोऽपि तेन उट्टङ्क्यते । विवाहादनन्तरं वर्षे याते सा प्रभा तनययुगलं प्रसूतवती । सर्वत्र आनन्दस्य वातावरणं व्याप्तम् । पुत्रोत्पत्तौ प्रभायाः मानं परिवारे समाजे वर्द्धितम् । कविभाषया उच्यते,

**वर्षे याते तनययुगलं सा ह्यसावीत्प्रसन्ना**

**ग्रामे गेहे कुलपरिजने मोदवृद्धिं निधाय ।**

**मानस्तास्याश्चरमशिखरं प्राप मातृत्वदृप्तः**

**सौख्यं स्वीये रुचिरचरितैस्तुष्टदाम्पत्यजन्यम् ।।**[17]

पुनश्च पतेः त्यागादनन्तरं यदा देशे दुर्भिक्षः पतितः, तदा गृहं त्यक्त्वा बान्धवैस्साकं पुत्रद्वयं स्वीकृत्य बहिर्देशगमनकाले प्रभायाः पुत्रयोः दुर्दशा कविना वर्ण्यते । सा अतीव पथश्रान्ताऽपि द्वयोः रुग्णपुत्रयोः कथं लालनं पालनं च कृतवतीति कविः करुणचित्रमत्रोपस्थापयति । यथा –

**रूक्षा वेणी म्लानवस्त्रापिधाना**

**शान्ता क्लान्ता ध्वस्तसौन्दर्यसारा ।**

**रुग्णापत्यं वामभागे च रूढं**

**धृत्वा यत्नात्पोट्टलीं चादधाति ।।**

**अन्यं पुत्रं दक्षिणे लम्बमानं**

**धृत्वा क्लेशात्पांसुलिप्तार्द्रगन्धा ।**

---

[15] तत्रैव – 4/12-13

[16] तत्रैव – 4/29-30

[17] तत्रैव – 1/13

**त्यक्ता भर्त्रा स्वैरिणीसङ्गदोषान्**

**पूज्यात्मीयैः सानुतापेन याति ।।**

**शुष्कं स्तन्यं मानमन्यू विनष्टौ**

**नष्टा शक्तिर्मार्गजेन श्रमेण ।**

**किञ्चिद्दैवात्प्राप्तमेवाहरन्ती**

**नष्टाभीष्टा स्वल्पसत्त्वेव याति ।।**[18]

पुत्र एव मातुः कृते सर्वस्वं भवति । सर्वा अपि मातरः पुत्रस्य कृत एव जीवितुं वाञ्छन्ति । पुत्रस्य सुखायैव कार्यं कुर्वन्ति । एवं पतित्यक्ता प्रभा यद्यपि कष्टापन्नाऽऽसीत्, यद्यपि तस्याः जीवनं त्यक्तुमभिलाषाऽऽसीत् तथापि सा पुत्रस्नेहादेव जीवनं सन्धार्य स्थितवतीति कविनोच्यते । यथा –

**कष्टापन्नाऽभावयज्ञाय किं वा**

**दद्यात्प्रीतापत्यकं श्वासशेषम् ।**

**प्राणान् किं वा स्वीयकान् हा तितिक्षुः**

**पुत्रस्नेहाज्जीवनं सा बिभर्त्ति ।।**[19]

यदा पुत्रद्वयं स्वीकृत्य ओडिशाराज्यस्य बरगढ़जिल्लायाः आताबीराग्रामं प्रति आगच्छति, तदा तस्याः एकः बालः अतीवरुग्णः तत्रैव दिवंगतः । तदा मातुः यत्कारुणिकं चित्रं तदपि कविना अत्र हृदयसंवेद्यतया उपस्थापितः । यथा –

**मार्गक्लेशादल्पपानाच्छ्रमाद्वा**

**कृच्छ्रश्वासः कूजिताक्रन्दनेन ।**

**एको बालः शीर्णकङ्कालमात्रः**

**कन्थालग्नस्तत्र कैवल्यमाप ।।**

**चिन्ताऽनिद्रावेदनाऽसह्यपीडा-**

**स्तब्धा ह्येषा सत्त्वहीनेव तत्र ।**

**कारुण्येनैवाश्रुपातं विहाय,**

**शान्ता जाता धैर्यशीला धरेव ।।**[20]

कविः द्वितीयसर्गेऽपि मातृपुत्रसम्बन्धस्य उल्लेखनं करोति । कनिष्ठबालकस्य मृत्योरनन्तरं मातुः प्रभायाः मनसि असह्ययन्त्रणाऽऽसीत् । तथापि सा अतिरोदनशीला उदरपोषणार्थं श्रमजीविनी बभूव । कविनोच्यते–

**शिशुवियोगभवादतिरोदना-**

**च्छ्रयति दीर्घनिशासु विजागरम् ।**

**उदरपूर्त्तिकरश्रमसाधना-**

---

18 तत्रैव – 1/26–28

19 तत्रैव – 1/30

20 तत्रैव – 1/37–38

**दहह सा भृशदुर्बलतां गता ।।**[21]

कदाचित् पुत्रस्य शीतलस्पर्शः चन्दनस्पर्शसुखं ददाति, सन्तापं दूरीकरोति ; तथापि यदा स एव पुत्रः अनुचिताचरणं करोति, तदा सः कुलसमाजविनाशकारी भवतीति कविनोच्यते । यथा –

**यदपि तापनिवारकशीतला**

**मलयवत्तनयस्य तनुर्नृणाम् ।**

**अनुचिताचरणेऽग्निसमा च सा**

**कुलसमाजविनाशकरी भवेत् ।।**[22]

सुधाकरस्य वृद्धा माता पुत्रस्य कुकर्मणा अतीव चिन्तिताऽऽसीत् । तस्याः प्रेमातिशयः कुलवध्वाः प्रभायाः कृते कविना उट्टङ्कितः । प्रभा तया स्वीयकन्यारूपेणैवाचिन्तयत् । यदा ओडिशाराज्यत् प्रभा पुनः स्वग्रामं प्रति समागता, तदा पुत्रस्य कृष्णकर्मणः निन्दां कृत्वा मातृरूपेण प्रभायाः सुखकामानं कृत्वा कुलदेवतायाः समीपे तस्याः रक्षणार्थं प्रार्थयति । यथोक्तं कविना –

**वृद्धा ब्रूते कृष्णकल्पः सुतो मे**

**तद्वत् रूपाढ्या गुणाढ्याऽस्य पत्नी ।**

**बद्ध्वा पाणी नम्रशीर्षा प्रणम्य**

**तद्रक्षार्थं वंशदेवीं ययाचे ।।**[23]

एकदा सा वृद्धा माता निःसन्तानाऽऽसीत् । निःसन्तानां तां दृष्ट्वा जनाः समाजे वन्ध्यामिति मत्वा तस्याः मुखदर्शनम् अशुभशकुनमिति विचिन्त्य प्रत्यक्पदाः त्यक्तयात्राश्च बभूवुः । एतदर्थं सा पूजोपासनोपावासादिभिः एकमपत्यं प्राप्तवती । सोऽयं भवति सुधाकरः । तदुच्यते कविना –

**निस्सन्तानाया मे मुखं वीक्ष्य लोका**

**यान्ति स्म प्रत्यक्पदास्त्यक्तयात्राः ।**

**अस्माद्धेतोः पाठकल्पोपवासै-**

**रेकस्यापत्यस्य मे याचनाऽभूत् ।।**[24]

भारतीयपारम्परिकसमाजे एतद्भवति मातुः वैशिष्ट्यम् । पुत्रप्राप्त्यर्थं तया नैके उपवासाः क्रियन्ते, नैकत्र देवालयेषु गत्वा प्रार्थ्यते । पूजा, पाठः, यज्ञः, उपवासः इत्यादयः पुत्रप्राप्त्यर्थं पुराणादिषु अपि उल्लेखयोग्याः भवन्ति । किन्तु विडम्बनैषा यत् सुधाकरण मातृस्नेहं त्यक्त्वा कामवशः गृहं सम्पत्तिं त्यक्त्वा अन्यत्र पलायितः । कविनोच्यते –

**असह्यदुःखैः परिपोषितो यः**

**पुत्रोऽर्चनादानमखैः प्रसूतः ।**

**माताऽवदत्तीर्थघृतोपवासैः**

---

21 तत्रैव – 2/8

22 तत्रैव – 2/9

23 तत्रैव – 4/61

24 तत्रैव – 4/62

**सोऽप्यद्य मातुर्नयनात्सुदूरः ।।**[25]

एका माता पुत्रस्योज्ज्वलभविष्यत्कामनां करोति । तस्याः इच्छा भवति यत् पुत्रः एकदा कश्चन महापुरुषो भवतु । एतदर्थं पुत्रं सा गाढस्नेहैः पालयति, निरन्तरं प्रोत्साहयति, प्रतिष्ठितं विद्यालयं प्रति अध्ययनार्थं प्रेषयति । कोऽपि मानवः स्वपुत्रस्य लालनं पालनं कृत्वा यदा तं वर्धयति, अग्रे च पुत्रः दुराचरणं प्रदर्शयति, तर्हि अवश्यमेव मातुः हृदयं व्यथितं भवति । एतादृशं मातापुत्रस्नेहसम्बन्धः भावनाश्च कविना काव्येऽस्मिन् सम्यङ्निरूपिताः । यथा –

**प्रगाढमोहात्महदा सुपोषितः**

**मात्रा महामानवतामभीप्स्य ।**

**उद्बोधितश्चोज्ज्वलकामनाभि-**

**र्महार्घविद्यालयके निवेशितः ।।**[26]

अपि च –

**मनुष्यजन्मा निजसन्ततिं यः**

**पर्याप्तयत्नैर्धनवेश्मभिर्वा ।**

**सम्पोष्य प्राप्नोति निषिद्धवृत्तिं**

**दुःखाम्बुधौ मज्जति जीवितः सः ।।**[27]

(4) पितापुत्रसम्बन्धः – समाजे पितापुत्रयोः सम्बन्धोऽपि मधुरो भवति । सुयोग्यपुत्रः पितुः कुलस्य मर्यादां वर्धयति । किन्तु सुतो यदि अयोग्यो भवति दुष्कर्म करोति तर्हि कुलकीर्त्तिः विनश्यति । काव्येऽस्मिन् प्रधाननायकस्य सुधाकरस्य पिता अतीववृद्धः पुत्रस्य कुकर्मणा बहुधा निन्दितोऽस्ति । कविः पितुः मुखेन बहुत्र पुत्रेण कृतापराधस्य वर्णनां करोति । तत्र पञ्चमसर्गे उच्यते कविना सुधाकरपितृमुखेन –

**द्रव्यम्मे यच्छ्रमजविधिनोपार्जितं संगृहीतं**

**तत्तत्सर्वं रचितबहुभिस्तस्करान्तःक्रियाभिः ।**

**नीत्वा यातो गलितचरितो धूर्तनार्या समं वा**

**स्वामी चेन्नाशयति विभवं तद्गृहन्नष्टमेव ।।**[28]

समाजे एकः पिता आजीवनं श्रमं कृत्वा बहूनि धनानि सञ्चयति । पुत्रो यदि योग्यो भवति तर्हि तस्य धनस्य सदुपयोगः क्रियते । अयोग्यः पुत्रस्तु तत्सर्वं नाशयति । सुधाकरः पित्रा सञ्चितं सर्वमपि धनं स्वीकृत्य एकया धूर्तनार्या साकं पलायनं कृतवान् । अतः पिता तस्य निन्दां कृत्वा तस्य एतादृशीं क्रियां तस्कराणां क्रियेति वदति । पितुरनन्तरं पुत्र एव पित्रोपार्जितस्य धनस्य स्वामी भवति। यदि स एव स्वामी विभवं नाशयति तर्हि समाजे तस्य गृहमपि नष्टं भवतीति निश्चितार्थः कविना अत्रोपस्थापितः ।

एकः पिता सर्वदा पुत्रस्योन्नतिं दृष्ट्वा आनन्दितो भवति । यदा प्रभा तथा सुधाकरस्य पिता प्रयागं समागतौ, तदा सुधाकरः तत्र स्वकीयं भवनं निर्मितवानासीत् । तस्य कृते तत्र जनेषु महती सद्भावनाऽवर्तत । सर्वेषु जनेषु तदुपरि विश्वासभावना अवलोकिता । एतद् दृष्ट्वा

---

[25] तत्रैव – 4/64

[26] तत्रैव – 4/65

[27] तत्रैव – 4/66

[28] तत्रैव – 5/26

सुधाकरस्य पिता अतीवप्रफुल्लितो भवति, अपि च तस्य मङ्गलमयभविष्यत्कामनया जगत्पतेः समीपे तद्रक्षणार्थं प्रार्थयति । कविनोच्यते पितृमुखेन –

**पुत्रेण वासोऽत्र कृतो महार्घः**

**सद्भावना पार्श्वजनेषु सञ्चिता ।**

**विश्वासभावः परितोऽस्य जातो**

**जगत्पतिस्तस्य शुभं करोतु ।।**[29]

(5) सपत्नी – पतेः द्वितीया पत्नी सपत्नी अथवा पतिवत्नीति समाजे निगद्यते । कविः पूर्णचन्द्रः अस्मिन् काव्ये सुधाकरस्य द्वितीयपत्न्याः चरित्रं सुष्ठूपस्थापयति । सुधाकरः भातपराग्रामे तया साकं प्रेम कृत्वा गृहं त्यक्त्वा तामानीय प्रयागराजनगरमधितिष्ठति । यदा प्रयागं प्रति श्वशुरेण साकं प्रभा रेलयानेन गच्छन्त्यासीत् तदा श्वशुरः तस्याः सपत्न्याः विषये उल्लिखति –

**स्थूलाभासाऽनुभवरहिता शुभ्रवस्त्रापिधाना**

**स्नेहार्द्राकुञ्चितनयनयोर्नम्रतायास्तु मूर्त्तिः ।**

**अन्तर्वत्नी खचितवसना दृश्यते ते सपत्नी**

**मूढामालोकयसि सरले ! हन्त ! किं भाष्यमस्ति ।।**[30]

सा सपत्नी स्थूलकाया, गृहस्थानुभवैः हीनाः, सुन्दरवस्त्रधारिणी, प्रेमार्द्रा, नम्रमूर्त्तिः, गर्भवती, सौभाग्यशालिनी इति श्वशुरेण र्तुणाः उपस्थाप्यन्ते । सपत्नीं दृष्ट्वा काऽपि महिला सन्तुष्टा न भवति। तस्याः कृते पतेः प्रेम सर्वदा विभाजितं भवतीति अत्र हेतुः । काऽपि महिला स्वपतेः प्रेम अन्यस्याः कृते भवतु इति नेच्छति । अस्मात्कारणात् प्रभायाः मनसि अवश्यं खेदो भविष्यति, सपत्नीं दृष्ट्वा तस्याः मनसि कष्टमागमिष्यतीति वृद्धः श्वशुरः चिन्तयति ।

किन्तु यदा उभौ प्रयागं गत्वा सुधाकरस्य गृहं प्राप्तवन्तौ तदा सा सपत्नी झटिति समागत्य तयोः पादयोः पतित्वा प्रणामं कृतवती, सुधाकरस्य प्रभायाः पुत्रमालिङ्गितवती । अपि च प्रभामपि शिरसा आनर्च । एतद् दृष्ट्वा क्रोधासक्ताऽपि सा प्रभा विनम्रतामेव प्रदर्शितवती । अत्रोच्यते कविना –

**कुमारमातेव कुमारमातु-**

**रानर्च पादौ शिरसा निपत्य ।**

**सर्वंसहा सर्वसहायहीना**

**सामर्षनेत्राऽपि समभ्यनन्दत् ।।**[31]

कुलपरम्पया धनी वृद्धः हसित्वा तद्व्यवहारेण सन्तुष्टस्सन् पुत्रवधूं प्रभाम् अवदत् – हे पुत्रवधो ! त्वं येन केनापि प्रकारेण विश्वासमुत्पाद्य सपत्नीं तथा पतिं स्वगृहं प्रतिगन्तुं कथय इति। किन्तु प्रभा चिन्तयति यत् सपत्नी कदाऽपि सुखदायिनी न भवति । सामान्यतया समाजे विवाहद्वयं कृत्वा यदा कश्चन मानवः उभयोः कृते समानं प्रेम दर्शयति, उभाभ्यां साकं समानतया कामान्धः रमणं करोति, उभयोः इच्छाः समानरूपेण पूरयति, तथापि यदि काऽपि सपत्नी गुप्तरूपेण अपरस्याः सम्मुखे पतेः कृते इङ्गितानि दर्शयति, तदा हृदयं दह्यत एव । अतः प्रभया उच्यते –

---

29 तत्रैव – 8/6

30 तत्रैव – 5/40

31 तत्रैव – 8/3

**समानं सम्मानं ह्यधिकमभिमानं वहति चेत्-**

**मदान्धो मोदान्धः क्वचिदतितृषान्धः स्मरति चेत् ।**

**वियोगे संयोगे युगपदभियोगं धियति चेत्**

**तथापि प्रच्छन्नेङ्गितमनुदहेदेव हृदयम् ।।**[32]

अपि च सपत्नीविषये पुनः प्रभया चिन्त्यते यत्, यदि वा सा सपत्नी तस्याः कृते उत्तमव्यवहारं दर्शयिष्यति, अभावे स्वभावे वा कटुकुटिलवचनानि त्यक्ष्यसि ; तथापि यदा रात्रौ कामवशीभूतः मम सुन्दरपतिः तस्याः सर्वात्मना किङ्करत्वं भजिष्यति तर्हि आवयोर्मध्ये समानतां दातुं न प्रभविष्यति इति । तदुच्यते –

**सपत्नी सौभाग्यैर्व्यवहरति सापत्न्यदिशि चे-**

**दभावे सद्भावे कटुकुटिलभावं त्यजति चेत् ।**

**क्षपायां कामार्ता चपलकमनं किङ्करयति**

**स्वभावेनोन्मागीर् ह्युभयसमतां धारयति नो ।।**[33]

अतः समाजे परिवारे सपत्न्या साकम् एकस्मिन् गृहे निवासः दुःसाध्य एव भवतीति कविना अनेन काव्येन वार्तां ददाति। तस्मात्कारणादेव प्रभा तैस्साकं भातपारां न गत्वा साक्षात् प्रयागतः हावडानगरं प्रति समायाता ।

(5) विमाता – यदि कोऽपि पुरुषः विवाहद्वयं करोति, अपि च तयोः पत्न्योः मध्ये कस्या अपि एकः पुत्रो भवति ; तर्हि तस्य पुत्रस्य अपरा पत्नी विमाता इति उच्यते । विमातुः सम्बन्धः तेन पुत्रेण साकं कदाऽपि मधुरः न भवति समाजे । इयं भवति समाजस्य स्वाभाविकी स्थितिः । अत्र कविः पूर्णचन्द्रः प्रभायाः पुत्रेण साकं सुधाकरस्य द्वितीयपत्न्याः व्यवहारः साधुतया उपस्थापितः । यदा प्रभा स्वपुत्रं स्वीकृत्य प्रयागमागच्छति, तदा पुत्रं दृष्ट्वा सुधाकरस्य पत्नी सानन्दं तमालिङ्गति । मधुरमिष्टं मिष्टं तस्मै ददाति । यथोक्तं कविना –

**वधूपमा सा प्रणनाम पादौ**

**वृद्धस्य सन्तानवती सपत्न्याः ।**

**कुमारमाश्लिष्य हृदा प्रसन्ना**

**प्रादात्तदिष्टं कुशलाय मिष्टम् ।।**[34]

सः पुत्रोऽपि विमातरं तमाश्लिष्य अङ्कमधिवसन् आनन्दितोऽभूत् । अत्र कविः वदति यत् यथा काऽपि हस्तिनी स्वशिशुं स्वपृष्ठे स्थापयति तथा एषा सपत्नी प्रभायाः पुत्रम् अङ्के स्थापितवतीति। तद्धि–

**कुमार आश्लिष्य विमातरं तां**

**मुदा प्रसन्नोऽङ्कमधिष्ठितोऽभूत् ।**

**यथा करेणुः कलभं दधाति**

**तथैव तां शावक आरुरोह ।।**[35]

---

32 तत्रैव – 10/2

33 तत्रैव – 10/3

34 तत्रैव – 8/2

35 तत्रैव – 8/4

एवं काव्येऽस्मिन् कविना बहुत्र सामाजिकबन्धनानां चित्राणि उपस्थापयति। प्रभा, सुधाकरः, श्वशुरः, श्वश्रूः, सुधाकरस्य द्वितीयपत्नी (सपत्नी), प्रभायाः द्वौ पुत्रौ, भातपाराग्रामवासिनः बान्धवाः, नारीकल्याणसमितिसदस्याः महिलाः सख्यः, ग्रामश्रीपञ्चः (सरपञ्चः), रेलगमनसमेय प्राप्ताः परिचिताः युवानः, मदरटेरेसा, सहकर्मिणः श्रमिकाः, कृषकाः, कुम्भमेलाभक्ताः इत्यादीनां चरित्राणामुपस्थापनां कृत्वा कविः आधुनिकसमाजस्य प्रात्यक्षिकं वर्णनं करोति काव्येऽस्मिन्। समाजे उत्तमाः जनाः अपेक्ष्यन्ते। विपद्ग्रस्तानां सहयोगः एव समाजस्य प्रधानं लक्ष्यं भवति।

पतिपरित्यक्ता प्रभा अतीवकष्टेन व्याधिग्रस्तेऽस्मिन् समाजे सङ्घर्षं कृत्वा स्वजीवनं यापितवतीति कारणेन काव्यस्यास्य नाम 'अपराजितावधूः" इति दत्तम् । यदा काऽपि प्रभावन्महिला समाजे जीवति, तर्हि तस्याः कृते प्रतिवेशिनीनां निन्दावचासिं सर्वदा बाणायन्ते । कविः अस्मिन् सन्दर्भेऽपि पञ्चमसर्गे उपस्थाप्यते। यथा –

**एकाः पूर्वाग्रहविचलिताः पिष्टमापेषयन्ति**

**कार्याकार्येष्वगतिमुखराः पार्श्वगाः क्लेशयन्ति ।**

**अत्यात्मीयाः सुमतिललनाः संस्मरन्त्यो विशेषं**

**स्नेहाधिक्यं निभृतनिभृतैरिङ्गितैः प्रेषयन्ति ।।**[36]

केचन प्रतिवेशिनः दुष्टाः भवन्ति, केचन च आत्मीयाः सन्तीति कविरत्र निगदति। ये दुष्टाः ते सर्वदा अवमाननामेव प्रयच्छन्ति, व्याजनिन्दां कुर्वन्ति, पीडयन्ति च। किन्तु आत्मीयाः भवन्ति ते सर्वदा सद्व्यवहारान् प्रदर्शयन्ति, प्रेरयन्ति, श्रद्धां प्रदर्शयन्ति, आश्वासयन्ति च।

समाजे एकस्योत्तमपरिवारस्य सुष्ठु निर्वाहः विश्वासेनैव भवति । यदि विश्वासस्य भङ्गः जायते तर्हि सः परिवारः विनश्यति । कविनोच्यते –

**विश्वासोऽयं सकलपरिवारस्य वै मेरुदण्डः**

**गार्हस्थ्ये वा क्वचिदपि मनाक् मास्तु विश्वासभङ्गः ।**

**जाते भङ्गे समरुधिरजातं कुटुम्बं विनश्येत्**

**विश्वासेन त्रिभुवनपतेः सृष्टिकर्तृत्वसिद्धिः ।।**[37]

एवं प्रकारेण काव्येऽस्मिन् श्रीमता पूर्णचन्द्रेण कविना प्रभायाः चरित्रमाध्येन तात्कालिक-समाजस्य दुःस्थितेः वर्णना क्रियते। प्रभा विशिष्टतया श्वशुरेण श्वश्रा च विश्वस्ता आसीत्। उभयोः स्नेहः प्रभायाः कृते अतुलनीयत्वेन कविना काव्येऽस्मिन् उपस्थाप्यते। यदा प्रभा दुर्भिक्षग्रस्तं ग्रामं त्यक्त्वा ओडिशाराज्यं प्रति समागता, अपि च पुनः भातपारां प्रतिनिवृत्ता, तदा श्वशुरः पौत्रं कुलवधूं च सम्प्राप्यात्यन्तमानन्दितो भवति। अत्र कविः पौत्रप्रीतिमपि साधु वर्णयति। समगतायाः कुलवध्वाः हस्ते गृहस्य समग्रं दायित्वं समर्पयति। तदुच्यते कविना –

**त्वत्स्वामित्वे गृहमिदमतस्त्वं विधात्री कृषेश्च**

**त्वं पुत्रो मे त्वमसि जननी देविका सेविका वा ।**

**दुःखाम्भोधेस्त्वदपसरणात् त्रासदुःखानि सोढ्वा**

**त्वद्रक्षार्थं नियतनियमो यत्नवानस्मि बाले ! ।।**[38]

---

[36] तत्रैव - 5/32

[37] तत्रैव - 5/15

[38] तत्रैव - 5/23

एतादृशं चिन्तनं परिवारे सर्वेषामपि श्वशुरस्थानालङ्कृतवतां मानवानां भवति। विवाहादनन्तरं कुलवध्वाः हस्ते एव सम्पूर्णस्य गृहस्य दायित्वं समर्प्यते ।

कविः काव्येऽस्मिन् प्रसङ्गात् प्रभायाः श्वशुरस्य मातृस्वषुः प्रस्तावनां करोति, अपि च श्रीपञ्चस्य जामातुः, कन्यायाश्च प्रसङ्गमपि उपस्थापयति। श्रीपञ्चस्य कन्या प्रेमविवाहं करोति, केनापि कारणेन सामाजिकपीडया अथवा मानसिकपीडया सा कन्या जामात्रा साकमात्महत्यं करोति। एतादृशाः घटना अपि सामाजिकव्याधिरूपेण अधुनातनसमाजे अवलोक्यन्ते ।

एवं सामाजिकबन्धनस्य सामाजिकसमस्यानाञ्चापूर्वं चित्रणं कृत्वा कविः प्रभावत्याः सुचारुचरित्रं प्रस्तौति। अतः सर्वाङ्गिणदृष्ट्या काव्यमिदं सर्वदा समाजस्य सामाजिकानां सहृदयानां च कृते नैतिकमूल्यानि शिक्षयति ।

**सन्दर्भग्रन्थसूची**

**1**. संस्कृत महाकाव्यों का राहासविहारी द्विवेदी समालोचनात्मक अध्ययन लालबहादूरशास्त्रीराष्ट्रियसंस्कृतविद्यापीठम्, दिल्ली **2001**

**2**.भारतीय सामाजिक संस्था डा.इन्दु सोनी एवं तु मिश्रा, शिवालिका प्रकाशन एवं राजशास्त्र (दिल्ली), **2016**

**3**.भारतीयसंस्कृतिपरिचयः डा.सुरेन्द्रकुमारमिश्रः, सांविदीप्रकाशनम्, मोचिसाहि, पुरी, **2016**

**4**.प्राचीन भारतीय समाज डा.ओ.पी.सिंह, शारदा पुस्तक भवन (इलाहाबाद), एवं शासन **2003**

**5**.अपराजितवधूमहा**काव्यम्** डा.पूर्णचन्द्र शास्त्री कलावटिया, हिन्द्यनुवादः - डा. पुष्पादीक्षितः प्रतिभाप्रकाशनम्, **29/5**, शक्तिनगर, दिल्ली, **2000**